योगवासिष्ठः/प्रकरणम् ३ (उत्पत्तिप्रकरणम्)/सर्गः ०७१

एकसप्ततितमः सर्गः ७१

श्रीवसिष्ठ उवाच ।

अथ सा बहुकालेन कर्कटी नाम राक्षसी ।

सर्वेषां नरमांसानां नतु तृप्तिमुपाययौ ।। १

पूर्वेणैव किलाह्ना सा तृप्ता रुधिरबिन्दुना ।

सूच्याः किमिव मात्यन्तस्तृष्णासूची सुदुर्भरा ।। २

चिन्तयामास हा कष्टं किमहं सूचिता गता ।

सूक्ष्मास्मि हतशक्तिश्च अपि ग्रासो न माति च ।। ३

क्व मे तानि विशालानि गतान्यङ्गानि दुर्धियः ।

कालमेघविशालानि वने शीर्णानि पर्णवत् ।। ४

मय्यस्यां मन्दभाग्यायां मनागपि न माति हि ।

स्वादुमांसरसग्रासो वसावासित आसयन् ।। ५

पङ्कान्तर्विनिमज्जामि पतामि धरणीतले ।

हस्तास्मि जनपादौघैः शुक्रेण मलिनास्मि च ।। ६

हा हताहमनाथाहमनाश्वासा निरास्पदा ।

दुःखाद्दुःखे निमज्जामि संकटात्संकटेऽपि च ।। ७

न सखी न च मे दासी न मे माता न मे पिता ।

न मे बन्धुर्न मे भृत्या न मे भ्राता न मे सुतः ।। ८

न मे देहो न मे स्थानं न मे कश्चित्समाश्रयः ।

नैकस्थाने समावासो भ्राम्यामि वनपर्णवत् ।। ९

आपदां धुरि तिष्ठामि निविष्टास्मि सुदारुणे ।

अभावमपि वाञ्छामि सोऽपि संपद्यते न मे ।। 3.71.१०

स्वको देहः परित्यक्तो मूढचेतनया मया ।

काचबुद्ध्या विमूढेन हस्ताच्चिन्तामणिर्यथा ।। ११
आपतद्धि मनो मोहं पूर्वमापत्प्रयच्छति ।
पश्चादनर्थविस्ताररूपेण परिजृम्भते ।। १२
धूमेषु परितिष्ठामि मार्गे विलुलितास्मि च ।
तृणेषु प्रेषितास्म्यन्तर्हा मे दुःखपरम्परा ।। १३
परप्रैषकरी नित्यं परसंचारचारिणी ।
परं कार्पण्यमायाता जाता परवशास्म्यलम् ।। १४
भ्रान्तिं करोमि तुच्छे च सापि वेधनरूपिणी ।
अहो ममाल्पभाग्याया दौर्भाग्यमपि दुर्भगम् ।। १५
उत्थितः स्फारवेतालः कुर्वत्याः शान्तिमद्य मे ।
सर्वनाशोऽवदातेन प्रवृत्ताया ममोदिता ।। १६
किं मन्दया मया तादृक्संत्यक्तं तन्महावपुः ।
यथा नाशेन वा भाव्यं तथोदेत्यशुभा मतिः ।। १७
मामवान्तरनिर्मग्नां सूक्ष्मां कीटतनोरपि ।
उद्धरिष्यति को नाम पांसुराशिभिरावृताम् ।। १८
विविक्तमनसां बुद्धौ क्व स्फुरन्ति हताशयाः ।
ग्राममार्गतृणानीव गिरेरुपरिवासिनाम् ।। १९
स्थिताया अज्ञताम्भोधौ क्व ममाभ्युदयो भवेत् ।
अन्धस्योदेति प्राकाश्यं नखद्योतानुसेविनः ।। 3.71.२०
अतः कियन्तं नो जाने कालमावलितापदम् ।
मयापच्छवभ्रगर्तेषु लुठितव्यं हतेहया ।। २१
कदा स्यामञ्जनमहाशैलपुत्रकरूपिणी ।
द्यावापृथिव्योर्वैधुर्ये स्तम्भतामनुतिष्ठत ।। २२
मेघमालासमभुजा चिरं विद्युत्पदेक्षणा ।
नीहारजालवसना प्रोच्चकेशमिताम्बरा ।। २३
लम्बोदराभ्रसंदर्शप्रनर्तितशिखण्डिनी ।
लम्बलोलस्तनी श्यामा देहवातद्रवत्स्तनी ।। २४
हासभस्मच्छटाच्छन्नसूर्यमण्डलरोधिनी ।
कृतान्तग्रसनोद्युक्तकृत्यैकाकृतिधारिणी ।। २५
कृशानूलूखलदृशा सूर्यस्रग्दामहारिणी ।

पर्वतात्पर्वते शृङ्गे न्यस्य पादौ विहारिणी ।। २६
कदा मे स्याद्गुरुश्वभ्रभासुरं तन्महोदरम् ।
कदा मे स्याच्छरन्मेघमेदुरा नखरावली ।। २७
कदा मे स्यान्महारक्षोविद्रावणकरं स्मितम् ।
स्वस्फिग्वाद्यैररण्यान्यां कदा नृत्येयमुन्मदा ।। २८
वसासवमहाकुम्भैर्मृतमांसास्थिसंचयैः ।
कदा करिष्येऽविरतं मेदुरोदरपूरणम् ।। २९
कदा पीतमहालोकरुधिरा क्षीबतां गता ।
भवेयं मुदिता दृप्ता मुद्रिता निद्रया ततः ।। 3.71.३०
मयैव कुतपोवह्नौ तदन्यं भासुरं वपुः ।
भस्मत्वं कनकेनेव सूचित्वमुररीकृतम् ।। ३१
क्व किलाञ्जनशैलाभं वपुर्भरितदिक्तटम् ।
क्व प्राचिकाखुरसमं सूचित्वं तृणपेलवम् ।। ३२
त्यजत्याशु मृदित्यज्ञः प्राप्यापि कनकाङ्गदम् ।
मया सूचित्वलोभेन संत्यक्तं भासुरं वपुः ।। ३३
हा महोदर विन्ध्याद्रिसनीहारगुहोपम ।
अद्य नान्तं करोषि त्वं कथं सिंहेन हस्तिनाम् ।। ३४
हा भुजौ भरनिर्भग्नशिखरौ शशभृन्नखैः ।
पुरोडाशधिया चन्द्रं कथमद्य न बाधतः ।। ३५
हा वक्षः काचवैधुर्यगिरीन्द्रतटसुन्दर ।
नाद्य सिंहादि यौकं तद्धृतं रोमवनं तथा ।। ३६
हा नेत्रे कृष्णरजनीरजःशुष्केन्धनैजने ।
कस्मान्न मे भूषयतो दृग्ज्वालामालया दिश ।। ३७
हा स्कन्ध बन्धो नष्टोऽसि निषिद्धोऽसि महीतले ।
कालेन विनिपिष्टोऽसि निघृष्टोऽसि शिलातले ।। ३८
हा मुखेन्दो तपसि किं नाद्य त्वं मम रश्मिभिः ।
कल्पान्तदावसंशान्तचन्द्रबिम्बमनोहर ।। ३९
हा हा हस्तौ महाकारौ तावद्य क्व गतौ मम ।
संपन्नास्मि महासूचिर्मक्षिकाखुरदोलिता ।। 3.71.४०
हा भगोग्रकरञ्जाढ्यसत्कन्दश्वभ्रशोभन ।

विन्ध्याद्धरेण्यविपुलनितम्बामलबिम्बक ।। ४१
क्वाकारोऽम्बरपूरकः क्व च नवं तुच्छात्मसूचीवपू ।
रोदोरन्ध्रसमं क्व वास्य कुहरं क्वेदं च सूचीमुखम् ।
क्व ग्रासो बहुमांसभारबहुलः क्वाब्बिन्दुना भोजनं
सूक्ष्मास्म्येतदहो मयैव रचितं स्वात्मक्षये नाटकम्

इत्यार्षे श्रीवासिष्ठमहारामायणे मोक्षोपाये उत्पत्तिप्रकरणे क० सूचिकापरिदेवनं नामैकसप्ततितमः सर्गः ।। ७१ ।।